योगवासिष्ठः/प्रकरणम् १ (वैराग्यप्रकरणम्)/सर्गः २८

अष्टाविंशः सर्गः २८

श्रीराम उवाच ।

यच्चेदं दृश्यते किंचिज्जगत्स्थावरजंगमम् ।

तत्सर्वमस्थिरं ब्रह्मन्स्वप्नसंगमसंनिभम् ।। १

शुष्कसागरसंकाशो निखातो योऽद्य दृश्यते ।

स प्रातरभ्रसंवीतो नगः संपद्यते मुने ।। २

यो वनव्यूहविस्तीर्णो विलीढगगनो महान् ।

दिनैरेव स यात्युर्वीसमतां कूपतां च वा ।। ३

यदङ्गमद्य संवीतं कौशेयस्रग्विलेपनैः ।

दिगम्बरं तदेव श्वो दूरे विशरिताऽवटे ।। ४

यत्राद्य नगरं दृष्टं विचित्राचारचञ्चलम् ।

तत्रैवोदेति दिवसैः संशून्यारण्यधर्मता ।। ५

यः पुमानद्य तेजस्वी मण्डलान्यधितिष्ठति ।

स भस्मकूटतां राजन्दिवसैरधिगच्छति ।। ६

अरण्यानी महाभीमा या नभोमण्डलोपमा ।

पताकाच्छादिताकाशा सैव संपद्यते पुरी ।। ७

या लतावलिता भीमा भात्यद्य विपिनावली ।

दिवसैरेव सा याति पुनर्मरुमहीपदम् ।। ८

सलिलं स्थलतां याति स्थलीभवति वारिभूः ।

विपर्यस्यति सर्वं हि सकाष्ठाम्बुतृणं जगत् ।। ९

अनित्यं यौवनं बाल्यं शरीरं द्रव्यसंचयाः ।

भावाद्भावान्तरं यान्ति तरङ्गवदनारतम् ।। १०

वातान्तर्दीपकशिखालोलं जगति जीवितम् ।
तडित्स्फुरणसंकाशा पदार्थश्रीर्जगत्त्रये ।। ११
विपर्यासमियं याति भूरिभूतपरम्परा ।
बीजराशिरिवाजस्रं पूर्यमाणः पुनःपुनः ।। १२
मनःपवनपर्यस्तभूरिभूतरजःपटा ।
पातोत्पातपरावर्तपराभिनयभूषिता ।। १३
आलक्ष्यते स्थितिरियं जागती जनितभ्रमा ।
नृत्तावेशविवृत्तेव संसाराारभटीनटी ।। १४
गन्धर्वनगराकारविपर्यासविधायिनी ।
अपाङ्गभङ्गुरोदारव्यवहारमनोरमा ।। १५
तडित्तरलमालोकमातन्वाना पुनःपुनः ।
संसाररचना राजन्नृत्तसक्तेव राजते ।। १६
दिवसास्ते महान्तस्ते संपदस्ताः क्रियाश्च ताः ।
सर्वं स्मृतिपथं यातं यामो वयमपि क्षणात् ।। १७
प्रत्यहं क्षयमायाति प्रत्यहं जायते पुनः ।
अद्यापि हतरूपाया नान्तोऽस्या दग्धसंसृतेः ।। १८
तिर्यक्त्वं पुरुषा यान्ति तिर्यञ्चो नरतामपि ।
देवाश्चादेवतां यान्ति किमिवेह विभो स्थिरम् ।। १९
रचयन्रश्मिजालेन रात्र्यहानि पुनःपुनः ।
अतिवाह्य रविः कालो विनाशावधिमीक्षते ।। २०
ब्रह्मा विष्णुश्च रुद्रश्च सर्वा वा भूतजातयः ।
नाशमेवानुधावन्ति सलिलानीव वाडवम् ।। २१
द्यौः क्षमा वायुराकाशं पर्वताः सरितो दिशः ।
विनाशवाडवस्यैतत्सर्वं संशुष्कमिन्धनम् ।। २२
धनानि बान्धवा भृत्या मित्राणि विभवाश्च ये ।
विनाशभयभीतस्य सर्वं नीरसतां गतम् ।। २३

स्वदन्ते तावदेवैते भावा जगति धीमते ।
यावत्स्मृतिपथं याति न विनाशकुराक्षसः ।। २४
क्षणमैश्वर्यमायाति क्षणमेति दरिद्रताम् ।
क्षणं विगतरोगत्वं क्षणमागतरोगताम् ।। २५
प्रतिक्षणविपर्यासदायिना निहतात्मना ।
जगद्भ्रमेण के नाम धीमन्तो हि न मोहिताः ।। २६
तमःपङ्कसमालब्धं क्षणमाकाशमण्डलम् ।
क्षण कनकनिष्यन्दकोमलालोकसुन्दरम् ।। २७
क्षणं जलदनीलाब्जमालावलितकोटरम् ।
क्षणमुड्डामररवं क्षणं मूकमिव स्थितम् ।। २८
क्षणं ताराविरचितं क्षणमर्केण भूषितम् ।
क्षणमिन्दुकृताह्लादं क्षणं सर्वबहिष्कृतम् ।। २९
आगमापायपरया क्षणसंस्थितिनाशया ।
न बिभेति हि संसारे धीरोऽपि क इवानया ।। ३०
आपदः क्षणमायान्ति क्षणमायान्ति संपदः ।
क्षणं जन्म क्षणं मृत्युर्मुने किमिव न क्षणम् ।। ३१
प्रागासीदन्य एवेह जातस्त्वन्यो नरो दिनैः ।
सदैकरूपं भगवन्किंचिदस्ति न सुस्थिरम् ।। ३२
घटस्य पटता दृष्टा पटस्यापि घटस्थितिः ।
न तदस्ति न यद्दृष्टं विपर्यस्यति संसृतौ ।। ३३
तनोत्युत्पादयत्यत्ति निहत्यासृजति क्रमात् ।
सततं रात्र्यहानीव निवर्तन्ते नरं प्रति ।। ३४
अशूरेण हतः शूर एकेनापि हतं शतम् ।
प्राकृताः प्रभुतां याताः सर्वमावर्त्यते जगत् ।। ३५
जनतेयं विपर्यासमजस्रमनुगच्छति ।
जडस्पन्दपरामर्शात्तरङ्गाणामिवावली ।। ३६

बाल्यमल्पदिनैरेव यौवनश्रीस्ततो जरा ।

देहेऽपि नैकरूपत्वं कास्था बाह्येषु वस्तुषु ।। ३७

क्षणमानन्दितामेति क्षणमेति विषादिताम् ।

क्षणं सौम्यत्वमायाति सर्वस्मिन्नटवन्मनः ।। ३८

इतश्चान्यदितश्चान्यदितश्चान्यदयं विधिः ।

रचयन्वस्तुनायाति खेदं लीलास्विवार्भकः ।। ३९

चिनोत्युत्पादयत्यत्ति निहत्यासृजति क्रमात् ।

सततं रात्र्यहानीव निवर्तन्ते नरं प्रति ।। ४०

आविर्भावतिरोभावभागिनो भवभागिनः ।

जनस्य स्थिरतां यान्ति नापदो न च संपदः ।। ४१

कालः क्रीडत्ययं प्रायः सर्वमापदि पातयन् ।

हेलाविचलिताशेषचतुराचारचञ्चुरः ।। ४२

समविषमविपाकतो विभिन्ना-

स्त्रिभुवनभूतपरम्पराफलौघाः ।

समयपवनपातिताः पतन्ति

प्रतिदिनमाततसंसृतिद्रुमेभ्यः ।। ४३

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये वैराग्यप्रकरणे सर्वभावाऽविरतविपर्यासप्रतिपादनं नामाष्टाविंशः सर्गः ।। २८ ।।